संस्कृतकाव्यशास्त्रग्रन्थेषु कविशिक्षायाः समीक्षणात्मकमध्ययनम्

संस्कृत-संस्कृतेतरभाषासङ्काये विद्यावारिधिः(Ph.D) इत्युपाधये

प्रस्तावितं शोधप्रबन्धस्य शोधप्रारूपम्

शोधच्छात्रा

कु. राधा देशकरः

मार्गदर्शिका

प्रो. कविता होले

अधिष्ठात्री तथा विभागप्रमुखा

संस्कृतभाषा-साहित्यविभागः

कविकुलगुरुकालिदाससंस्कृतविश्वविद्यालय; रामटेकम्, नागपुरम्

संस्कृतभाषा-साहित्यविभागः

कविकुलगुरुकालिदाससंस्कृतविश्वविद्यालय; रामटेकम्, नागपुरम्

सत्र-२०२३ -२४

अनुक्रमणिका

- प्रास्ताविकम्
- संशोधनस्य आवश्यकता
- संशोधनस्य उद्दिष्टानि
- प्राक्कल्पना
- पूर्वसंशोधनम्
- संशोधनपद्धतिः
- व्याप्तिः मर्यादा च
- अध्यायविभागः
- सन्दर्भसूचिः
- सन्दर्भग्रन्थसूचिः

संस्कृतकाव्यशास्त्रग्रन्थेषु कविशिक्षायाः समीक्षणात्मकमध्ययनम्

प्रास्ताविकम् –

संस्कृतवाङ्मये काव्यशास्त्रस्य स्थानं महत्त्वपूर्णमस्ति। काव्यशास्त्रस्य अपरं नाम सौन्दर्यशास्त्रमिति, यतः अस्मिन् शास्त्रे काव्यस्य सौन्दर्यवर्धकानां रसगुणालङ्कारादीनां सौन्दर्यपरकतत्त्वानां निरूपणं कृतमस्ति। काव्यशास्त्रमित्यत्र शास्त्रपदमनुशासनार्थे वर्तते। अनुशासने शिक्षाऽन्तर्भवति। कविशिक्षा इति काव्यशास्त्रस्य प्रतिपाद्यविषयः अस्ति इति विद्वन्मतं वर्तते। कविशिक्षा नाम कविभ्यः शिक्षा, कवीनां कृते शिक्षा, कविविषयिणी वा शिक्षा इति। पी. व्हि. काणे महोदयानां मतानुसारेण ये ग्रन्थाःकवीनां कृते व्यावहारिकं, प्रायोगिकं च निर्देशं ददति, ते कविशिक्षाग्रन्थाःइति प्रसिद्धाःसन्ति।[1] कवीनां कृते काव्यनिर्मितेः मार्गदर्शनमिति कविशिक्षायाः उद्देश्यम्। यथा –

वृत्तपूरणमुद्योगः पाठः परकृतस्य च ।

काव्याङ्गविद्याधिगमः समस्यापरिपूरणम्।। [२]

अर्थात् प्राप्तगिरः कवेः शिक्षाविषये आचार्यक्षेमेन्द्रः उक्तवान् यत् कविना वृत्तपूरणार्थं प्रयत्नः कर्तव्यः। अन्येषां कवीनां रचना पठनीया। तथैव काव्योपकारिकाणां विद्यानां ज्ञानं प्राप्तव्यम्। समस्यापूर्तेः प्रयासः करणीयः। क्वचित् काव्यशास्त्रग्रन्थेषु अलङ्कारयोजना, व्याकरणदोषा; काव्यशक्तिः इत्यादीनां कविशिक्षाविषयकतत्त्वानां चर्चा दृश्यते। यथा–

शब्दाभिधेये विज्ञाय कृत्वा तद्विदुपासनाम् ।

विलोक्यान्यनिबन्धांश्च कार्यःकाव्यक्रियादरः।। [३]

अतःप्रजानां व्युत्पत्तिमभिसन्धाय सूरयः। [४]

वामनाचार्यैः रचितायां काव्यालङ्कारसूत्रवृत्तौ न कर्तव्यम्, न प्रयोक्तव्यम्, न विधेयं, प्रयोज्या; अन्वेष्यःइत्यादयःविद्यर्थप्रयोगाःविद्यन्ते।

एतेषु काव्यशास्त्रग्रन्थेषु काव्यनिर्मितिसमये के अंशाः अवधारणीयाः इत्यस्मिन् विषये चर्चा कृतास्ति। एतत्सर्वं कविशिक्षायामन्तर्भवति। एतदनुसृत्य संस्कृतकाव्यशास्त्रग्रन्थेषु कविशिक्षायाः

समीक्षणात्मकमध्ययनम् इत्येषः विषयः स्वीकृतः। रससम्प्रदायप्रवर्तकाचार्यभरतमुनितः रसगङ्गाधरकार-पण्डितराजजगन्नाथपर्यन्तं ये काव्यशास्त्रज्ञाः सन्ति, तेषां ग्रन्थेषु स्थितायाः कविशिक्षायाः अध्ययनं प्रस्तुतप्रबन्धे क्रियते। रसालङ्कारध्वन्यौचित्यादीनां काव्यस्य उपकारकतत्त्वानां कविशिक्षादृष्ट्या समीक्षणात्मकमध्ययनं प्रस्तूयते।

संशोधनस्य आवश्यकता -

- प्रस्तुतसंशोधनद्वारा काव्यशास्त्रदृष्ट्या काव्यनिर्मितिसमये काव्यतत्त्वानां प्रयोगः कथं कर्तव्यः इति ज्ञायते।
- काव्यस्य समीक्षणार्थं प्रस्तुतसंशोधनं साहाय्यभूतं भविष्यति।
- उत्तमकाव्यनिर्माणार्थमपेक्षिततत्त्वानां चर्चा प्रस्तुतसंशोधनमाध्यमेन भविष्यति।

संशोधनस्य उद्दिष्टानि–

- उत्तमकाव्यनिर्माणाय उपकारकाणां रसादितत्त्वानामध्ययनम्।
- कविभ्यःमार्गदर्शनाय काव्यस्वरूप-काव्यहेतु-काव्यलक्षणानां कविशिक्षादृष्ट्या अध्ययनम्।
- काव्यनिर्माणार्थमावश्यकानां वृत्तानां कविशिक्षादृष्ट्याध्ययनम्।

प्राक्कल्पना -

सर्वैःकाव्यशास्त्रज्ञैःउपदिष्टा कविशिक्षा उत्तमकाव्यनिर्मितौ साहाय्यकारिणी भवति।

पूर्वसंशोधनम् -

1. अभिराज राजेन्द्रमिश्र की कृतियों में कविशिक्षा प्रयोग (जानकीजीवनम् और वामनावतरणम् महाकाव्यों के विशिष्ट सन्दर्भ में) शोधकर्ता – कपिल देव ,पंजाबी विश्वविद्यालय, पटियाला २०२०
2. संस्कृतवाङ्मये कविशिक्षाः समीक्षात्मकप्रस्तुति; लेखकः जनार्दनप्रसादपाण्डेयः मणि; वैशम्पायन प्रकाशन, प्रथम संस्करण २०११

3. 'कविकण्ठाभरणम्' में प्रतिपादित कविशिक्षा – एक अनुशीलन, डॉ. तरुण कुमार शर्मा, इंटरनॅशनल जर्नल ऑफ संस्कृत रिसर्च (अनंता) ISSN 2394-7519
4. कविशिक्षाग्रन्थानां शोध-सर्वेक्षणम्, उमेश चन्द्र जोशी, इंटरनॅशनल जर्नल ऑफ संस्कृत रिसर्च (अनंता) ISSN 2394-7519

संशोधनपद्धतिः-

- 'संस्कृतकाव्यशास्त्रग्रन्थेषु कविशिक्षा' इत्यस्मिन् शोधप्रबन्धे समीक्षणात्मिका संशोधनपद्धतिःप्रयुज्यते।
- कविशिक्षायाःआधारेण रसादितत्त्वानां समीक्षणात्मकमध्ययनं क्रियते।

व्याप्तिःमर्यादा च -

- रससम्प्रदायप्रवर्तकाचार्यभरतमुनितः रसगङ्गाधरकारपण्डितराजजगन्नाथपर्यन्तानामाचार्याणां काव्यशास्त्रग्रन्थानामध्ययनं करिष्यते।

  काव्यशास्त्रग्रन्थानां नामानि – नाट्यशास्त्रम्, काव्यालङ्कार; काव्यादर्श; काव्यालङ्कारसूत्रवृत्ति; ध्वन्यालोक; दशरूपकम्, वक्रोक्तिजीवितम्, औचित्यविचारचर्चा, सुवृत्ततिलकम्, काव्यप्रकाश; साहित्यदर्पणम्, रसगङ्गाधरः।

अध्यायविभागः -

प्रस्तावना

- **प्रथमोऽध्यायः**- कविशिक्षायाःइतिहासः।

प्रथमे अध्याये कविशिक्षायाःपरिचयःतथा इतिहासः। एवं कविशिक्षाविषयकग्रन्थानां विवरणं दीयते। कविकण्ठाभरणं, काव्यमीमांसा, काव्यकल्पलतावृत्तिःएतेषां ग्रन्थानां परिचयं प्रस्तूयते।

- **द्वितीयोऽध्यायः**-काव्यस्वरूप-काव्यहेतु-काव्यप्रयोजन-शब्दशक्ति-विषयिणी कविशिक्षा

कविशिक्षायाः अध्ययनस्य कृते काव्यस्य स्वरूपं, प्रयोजनं, काव्यहेतु; शब्दशक्तिः च एतेषां ज्ञानमपेक्षते। अतःएतेषां कविशिक्षादृष्ट्या अध्ययनम् अस्मिन् अध्याये क्रियते।

- **तृतीयोऽध्यायः** - रसतत्त्व-अलङ्कारविषयिणी कविशिक्षा

काव्यशास्त्रग्रन्थेषु निर्दिष्टानां रसतत्त्वानां शब्दालङ्कारार्थालङ्काराणां च कविशिक्षायाः अध्ययनमत्र क्रियते। कौ रसौ न मिश्रयेत्? रसपूर्णकाव्यनिर्मिति समये रसानां योजना कथं कर्तव्या। यथा- **रतिः सम्भोगश्रृङ्गाररूपा उत्तमदेवता विषया न वर्णनीया। तद्वर्णनं हि पित्रोः सम्भोगवर्णनमिवात्यन्तमनुचितम्।**[५]

रसपूर्णकाव्यनिर्माणाय के अलङ्काराः योजनीयाः परिहर्तव्याश्च, एवं शब्दालङ्काराणां प्रयोगः काव्यस्य चमत्कृत्यर्थमलङ्काराणां समायोजनं च इत्यस्मिन् विषये अध्ययनं क्रियते। यथा-

ध्वन्यात्मभूते श्रृङ्गारे समीक्ष्य विनिवेशितः।

रूपकादिरलङ्कारवर्ग एति यथार्थताम्॥[६]

- **चतुर्थोऽध्यायः** - रीति-ध्वनिविषयिणी कविशिक्षा

काव्यालङ्कारसूत्रवृत्तौ विवृतानां गुणानां कविशिक्षायाः अध्ययनमत्र क्रियते। गुणाः रसपोषकाः कथं भवन्ति? उत्तमकाव्यनिर्माणाय का रीतिः साहाय्यकारिणी गुणानां भवति? पूरकत्वेन वर्णयोजना कथं कर्तव्या? यथा–

मूर्ध्नि वर्गान्त्यगाःस्पर्शा अटवर्गा रणौ लघु।

अवृत्तिर्मध्यवृत्तिर्वा माधुर्ये घटना तथा॥[७]

ध्वनिकाव्यनिर्मितिसमये अलङ्कारगुणादितत्त्वानां प्रयोगः कथं कर्तव्यः इत्यस्मिन् विषये अध्ययनं क्रियते। सहृदयहृदयाह्लादिकाव्यानिर्माणाय ध्वनितत्त्वस्य स्वरूपं ज्ञातव्यम्। यथा- **अनन्ता हि ध्वनेः प्रकाराःसहृदयानां व्युत्पत्तये तेषां दिङ्मात्रं कथितम्।**[८]

• पञ्चमोऽध्यायः - वक्रोक्त्यौचित्यविषयिणी कविशिक्षा

वक्रोक्त्यौचित्ययोः कविशिक्षायाः अध्ययनमत्र क्रियते। वक्रोक्तिं विना काव्यमेव नोत्पद्यते। वक्रोक्तिजीवितमिति ग्रन्थस्थोपदेशानाम् अध्ययनं क्रियते। यथा- **लिङ्गवैचित्र्यवक्रत्वम्। यत्रानेकलिङ्गसम्भवेऽपि सौकुमार्यात् कविभिःस्त्रीलिङ्गमेव प्रयुज्यते।**[९]

यथेयं ग्रीष्मोष्मव्यतिकरवती पाण्डुरभिदा

मुखोद्भिन्नम्लानानिलतरलवल्लीकिसलया।

तटी तारं ताम्यत्यतिशशियशाःकोऽपि जलद-

स्तथा मन्ये भावी भुवनवलयाक्रान्तिसुभगा।।

अत्र त्रिलिङ्गत्वे सत्यपि 'तट' शब्दस्य, सौकुमार्यात् स्त्रीलिङ्गमेव प्रयुक्तम्।[१०]

तथैव उत्तमकाव्यनिर्माणाय औचित्यस्य योजना एवम् अनौचित्यस्य परिहारः कथं कर्तव्यः इत्यस्मिन् विषये उपदेशाःऔचित्यविचारचर्चाग्रन्थे प्राप्यन्ते तेषाम् अध्ययनञ्च क्रियते। "यथा-

औचित्यरचितं वाक्यं सततं संमतं सताम्।

त्यागोदग्रमिवैश्वर्यं शीलोज्ज्वलमिव श्रुतम्॥

औचित्यरचितं वाक्यं काम्यविवेकविचक्षणानामभिमततमम्।

यथा मम विनयवल्ल्याम् -

देवो दयावान्विजयो जितात्मा यमौ मनःसंयममाननीयौ।

इति ब्रुवाणःस्वभुजं प्रमार्ष्टि यःकीचकालिककालदण्डम्।।

धीरःस किर्मीरजटासुरारिःकुबेरशौर्यप्रशमोपदेष्टा।

दृष्टो हिडिम्बादयितःकुरूणां पर्यन्तरेखागणनाकृतान्तः॥

(युग्मकम्)

अत्र भीमस्य भीमचरितोचितकीचकाकालिककालदण्डहिडिम्बादयितादिभिः पदैरुन्निद्ररौद्रस्वरूपानुरूपो वाक्यार्थःसजीव इव भासते"।[११]

• षष्ठोऽध्यायः- दोष-छन्दसां विषयिणी कविशिक्षा

काव्यशास्त्रग्रन्थेषु निर्दिष्टानां दोषाणां तथा वृत्तानां कविशिक्षायाः अध्ययनमत्र क्रियते। काव्ये पददोषा; वाक्यदोषाः अनुचितशब्दप्रयोगाः व्याकरणदोषाः च सन्ति। एते दोषाः कथं निराकरणीयाः इत्यस्मिन् विषये काव्यशास्त्रग्रन्थेषु ये उपदेशाःप्राप्यन्ते तेषाम् अध्ययनं क्रियते। यथा–

श्रुतिदुष्टादयो दोषा अनित्या ये च दर्शिताः।

ध्वन्यात्मन्येव शृङ्गारे ते हेया इत्युदाहृताः॥[१२]

सुवृत्ततिलकमिति ग्रन्थानुगुणं रसानुसारं तथा प्रसंगानुसारं वृत्तानां योजना उपदिष्टा। तस्याः अध्ययनं करिष्यते। यथा-

शास्त्रकाव्येऽतिदीर्घाणां वृत्तानां न प्रयोजनम्।

काव्यशास्त्रेऽपि वृत्तानि रसायत्तानि काव्यवित्।।[१३]

• उपसंहारः

संस्कृतकाव्यशास्त्रग्रन्थेषूपदिष्टायाः कविशिक्षायाः समीक्षणात्मकमध्ययनं कृत्वा निष्कर्षाः उपस्थापयिष्यन्ते।

सन्दर्भसूचिः -

1. History of Sanskrit Poetics – P. V. Kane -(अनु.) इन्द्र चन्द्र शास्त्री, मोतीलाल बनारसीदास, पटना, वाराणसी १९६०
2. ३/२, कविकण्ठाभरणम्, महाकविक्षेमेन्द्र; प्रा. वामन लेले प्रकाशकः- मोतीलाल बनारसीदास, १९६७
3. १०/१,काव्यालङ्कार; आचार्यभामह; चौखम्बा संस्कृत सीरिज, वाराणसी १९९८
4. ९/१, काव्यादर्श; आचार्यदण्डी, चौखम्बा विद्याभवनम् – १९३८
5. ८१/७, काव्यप्रकाश; आचार्यमम्मट; चौखम्बा प्रकाशन, वाराणसी १९९५
6. १७/२, ध्वन्यालोक; आचार्यानन्दवर्धन; चौखम्बाभारती अकादमी, वाराणसी १९८८
7. ९८/८, काव्यप्रकाश; आचार्यमम्मट; चौखम्बा प्रकाशन, वाराणसी १९९५
8. ४४/३, ध्वन्यालोक; आचार्यानन्दवर्धन; चौखम्बाभारती अकादमी, वाराणसी १९८८

9. १९/१, वक्रोक्तिजीवितम्, आचार्यकुन्तक; चौखम्बा प्रकाशनम्, वाराणसी, १९६१
10. २२/२, वक्रोक्तिजीवितम्, आचार्यकुन्तक; चौखम्बा प्रकाशनम्, वाराणसी, १९६१
11. १२, औचित्यविचारचर्चा, महाकविक्षेमेन्द्र; चौखम्बा विद्याभवनम्, वाराणसी २०१०
12. ११/२, ध्वन्यालोक; आचार्यानन्दवर्धन; चौखम्बाभारती अकादमी, वाराणसी १९८८
13. ३/८, सुवृत्ततिलकम्, आचार्यक्षेमेन्द्र; चौखम्बा संस्कृत सीरिज, वाराणसी १९९८

सन्दर्भग्रन्थसूचिः -

1. आचार्यमम्मट; काव्यप्रकाश; चौखम्बा प्रकाशनम्, वाराणसी १९९५
2. आचार्यदण्डी, काव्यादर्श; चौखम्बा विद्याभवनम् – १९३८
3. आचार्यभामह; काव्यालङ्कार; चौखम्बा संस्कृत सीरिज, वाराणसी १९९८
4. आचार्यवामन; काव्यालङ्कारसूत्राणि, चौखम्बा प्रकाशनम्, वाराणसी १९२८
5. आचार्यानन्दवर्धन; ध्वन्यालोक; चौखम्बाभारती अकादमी, वाराणसी १९८८
6. आचार्यभरतमुनि; नाट्यशास्त्रम्, सम्पूर्णानन्दविश्वविद्यालय; वाराणसी १९९२
7. आचार्यकुन्तक; वक्रोक्तिजीवितम्, चौखम्बा प्रकाशनम्, वाराणसी, १९६१
8. आचार्यविश्वनाथ; साहित्यदर्पणम्, चौखम्बा संस्कृत संस्थान, वाराणसी, १९८४
9. आचार्यक्षेमेन्द्र; सुवृत्ततिलकम्, चौखम्बा संस्कृत सीरिज, वाराणसी १९९८
10. आचार्यविश्वनाथ; साहित्यदर्पणम्, चौखम्बा संस्कृत संस्थान, वाराणसी, १९८४
11. कविराजःराजशेखर; काव्यमीमांसा, प्रकाशकः- जयकृष्णदासःहरिदासःगुप्त;चौखम्बा संस्कृत सीरिज ऑफिस, बनारस १९९१
12. पण्डितराजःजगन्नाथ; रसगङ्गाधर; निर्णयसागरमुद्रणालय; मुम्बई, १९८८
13. महाकविक्षेमेन्द्र; औचित्यविचारचर्चा, चौखम्बा विद्याभवनम्, वाराणसी २०१०
14. महाकविक्षेमेन्द्र; कविकण्ठाभरणम्, प्रा. वामन लेले प्रकाशकः- मोतीलाल बनारसीदास, १९६७
15. Kane P.V., History of Sanskrit Poetics, (अनु.), इन्द्र चन्द्र शास्त्री, मोतीलाल बनारसीदास, पटना, वाराणसी १९६०

- **अन्तर्जालीयस्त्रोतांसि-**

- https://shodhganga.inflibnet.ac.in/
- https://shodhgangotri.inflibnet.ac.in/
- https://scholar.google.com/
- https://archive.org/details/texts
- https://search.worldcat.org/

मार्गदर्शिका	शोधच्छात्रा
प्रो. कविता होले	कु. राधा देशकर

अधिष्ठात्री तथा विभागप्रमुखा

संस्कृतभाषा-साहित्यविभागः

कविकुलगुरुकालिदाससंस्कृतविश्वविद्यालयः,रामटेकम्